## चतुर्दशः पाठः

0672CH14

# आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः




Reprint 2025-26

एकस्मिन् विशाले ग्रामे कश्चन भिक्षुकः आसीत्। यद्यपि सः उन्नतः दृढकायः च युवकः आसीत् तथापि सः **भिक्षाटनं** करोति स्म। मार्गे यः कोऽपि मिलति **तं** सः कथयति – "कृपया भिक्षां यच्छतु। दरिद्राय **दानं** करोतु। **पुण्यं** प्राप्नोतु।" इति। केचन जनाः तस्मै **धनं** यच्छन्ति। केचन च तर्जयन्ति।



एकदा तेन मार्गेण कश्चित् धनिकः आगच्छति। सः भिक्षुकः मनसि एव चिन्तयति – "अहो मम भाग्यम्। अद्य अहं **प्रभूतं धनं** प्राप्नोमि" इति।

भिक्षुकः **धनिकं** वदति – "आर्य! अहम् अतीव दरिद्रः अस्मि। कृपया **दानं** करोतु" इति।

धनिकः तं पृष्टवान् – "त्वं **किम्** इच्छसि ?"

"आर्य! अहं **प्रभूतं धनम्** इच्छामि" इति सः सविनयम् उक्तवान्।





Reprint 2025-26

तदा धनिकः वदति – "अहं तुभ्यं **सहस्रं रूप्यकाणि** यच्छामि।
त्वं मह्यं तव **पादौ** यच्छ।"



भिक्षुकः वदति – "अहं मम **पादौ** तुभ्यं कथं ददामि?
विना **पादौ** कथं वा चलामि?"

धनिकः वदति – "अस्तु, त्वं **पञ्चसहस्रं रूप्यकाणि** स्वीकुरु।
मह्यं तव **हस्तौ** यच्छ।"

भिक्षुकः वदति – "हस्ताभ्यां विना अहं कथं **भिक्षां** स्वीकरोमि?"

एवमेव धनिकः सहस्राधिकैः रूप्यकैः तस्य अनेकानि **शरीराङ्गानि** क्रेतुम् इष्टवान्। किन्तु भिक्षुकः निराकृतवान्।



तदा धनिकः उक्तवान्। "पश्य मित्र! तव समीपे एव **सहस्राधिकमूल्यकानि वस्तूनि** सन्ति। तथापि किमर्थं त्वम् आत्मानं **दुर्बलं** मन्यसे? सौभाग्येन एव वयं **मानवजन्म** प्राप्तवन्तः। अस्य सफलतार्थं **प्रयत्नं** कुरु। इतः गच्छ, शुभं भवतु" इति।

तस्माद् दिनात् भिक्षुकः **भिक्षाटनं** त्यक्त्वा परिश्रमेण धनार्जनं कृत्वा सगौरवं जीवनयापनम् आरब्धवान्।
अतः एव सज्जनाः वदन्ति –

**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥**



© NCERT not to be republished



Reprint 2025-26



**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥**

**पदच्छेदः**– आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः,
न अस्ति उद्यमसमः बन्धुः कृत्वा यं न अवसीदति।

**अन्वयः** – आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः (अस्ति)। उद्यमसमः बन्धुः नास्ति यं कृत्वा न अवसीदति।

**भावार्थः** – आलस्यं मनुष्याणां शरीरे स्थितः महान् शत्रुः अस्ति। यतो हि आलस्यस्य कारणात् कार्यं न सिद्ध्यति। एवमेव परिश्रमेण समानः बन्धुः अपि नास्ति यतो हि परिश्रमं कृत्वा कोऽपि दुःखं न आप्नोति।



© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| दृढकायः | दृढशरीरः | दृढ शरीर वाला | A person with strong body | |
| भिक्षाटनम् | भिक्षार्थं भ्रमणम् | भीख के लिए घूमना | Roaming for begging | |
| प्रभूतम् | पर्याप्तम्/अधिकम् | ढेर सारा | A lot of | |
| अतीव | अत्यधिकम् | बहुत सारा | Excessive | |
| मह्यम् | मम कृते | मुझे | For me | |
| शरीराङ्गानि | शरीरस्य अङ्गानि | शरीर के अङ्ग | Body parts | |
| निराकृतवान् | न स्वीकृतवान् | अस्वीकार किया | Refused | |
| दुर्बलम् | बलहीनम् | निर्बल | Weak | |
| त्यक्त्वा | त्यागं कृत्वा | त्याग करके | Having left | |
| नावसीदति | दुःखितः न भवति | दुःखी नहीं होता है | Doesn't feel sad | |



Reprint 2025-26

## वयम् अभ्यासं कुर्मः

१. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तराणि यच्छन्तु —

(क) भिक्षुकः किं करोति स्म ? – ..............................

(ख) कदाचित् तेन मार्गेण कः आगच्छति ? – ..............................

(ग) भिक्षुकः धनिकात् किम् इच्छति ? – ..............................

(घ) धनिकः भिक्षुकात् किं याचितवान् ? – ..............................

(ङ) सौभाग्येन वयं किं प्राप्तवन्तः ? – ..............................

२. अधोलिखितानां प्रश्नानाम् उत्तराणि 'आम्' अथवा 'न' इति पदेन लिखन्तु —

**यथा** – ग्रामे कश्चन भिक्षुकः आसीत्। ..........आम्..........

(क) भिक्षुकः उन्नतः दृढकायः च आसीत्। ..............................

(ख) जनाः तस्मै दण्डं यच्छन्ति। ..............................

(ग) भिक्षुकः प्रभूतं धनम् इच्छति। ..............................

(घ) भिक्षुकः धनिकाय पादौ ददाति। ..............................

(ङ) भिक्षुकः भिक्षाटनं त्यजति। ..............................

३. अधोलिखितेषु वाक्येषु द्वितीयाविभक्तेः शब्दानां द्विवचने परिवर्तनं कृत्वा वाक्यानि लिखन्तु —

**यथा** – चन्द्रशेखरः **लेखं** लिखति। ..........चन्द्रशेखरः लेखौ लिखति।..........

(क) आपणिकः **अङ्कनीं** ददाति। ..............................

(ख) मातामही **कथां** श्रावयति। ..............................

(ग) सैनिकः **मां** रक्षति। ..............................

(घ) कृष्णः **कन्दुकं** गृह्णाति। ..............................

(ङ) छात्रः **श्लोकं** पठति। ..............................



Reprint 2025-26

© NCERT not to be republished

४. चित्रं दृष्ट्वा द्वितीयाविभक्तेः वाक्यानि रचयन्तु—




बालिकाः .............................. गच्छन्ति।



पक्षिणः .............................. खादन्ति।



शिक्षकः .............................. पाठयति।



नर्तकी .............................. धरति।



अहं .............................. स्वीकरोमि।

© NCERT not to be republished



Reprint 2025-26

५. **कोष्ठके विद्यमानानां शब्दानां द्वितीयाविभक्तेः एकवचनरूपेण सह वाक्यानि लिखन्तु—**

यथा – भक्तः (देव) नमति। ............भक्तः देवं नमति।............

(क) छात्राः (ग्रन्थ) पठन्ति। ..............................

(ख) बालकाः (कथा) लिखन्ति। ..............................

(ग) रमा (लेखनी) क्रीणाति। ..............................

(घ) शिक्षकः (अस्मद्) पाठयति। ..............................

(ङ) अर्जुनः (नदी) पश्यति। ..............................

(च) पितामही (रजनी) आह्वयति। ..............................

(छ) अहं (युष्मद्) नमस्करोमि। ..............................

(ज) कृषकः (क्षेत्र) कर्षति। ..............................

(झ) पर्यटकः (कन्याकुमारी) गच्छति। ..............................

(ञ) चित्रकारः (चित्र) रचयति। ..............................

६. **द्वितीयाविभक्तेः एकवचनशब्दानां बहुवचने परिवर्तनं कृत्वा वाक्यानि रचयन्तु—**

यथा – वयं **सुभाषितं** वदामः। ............वयं सुभाषितानि वदामः।............

(क) अरुणः **दूरवाणीं** नयति। ..............................

(ख) पिता **लेखनीम्** आनयति। ..............................

(ग) जननी **पाकं** पचति। ..............................

(घ) मातामहः **मां** बोधयति। ..............................

(ङ) अग्रजा **त्वाम्** आह्वयति। ..............................

© NCERT not to be republished



Reprint 2025-26

७. अधः प्रदत्तं चित्रं दृष्ट्वा द्वितीयाविभक्तेः प्रयोगं कृत्वा दश वाक्यानि रचयन्तु—



(क) ..........................................................................................

(ख) ..........................................................................................

(ग) ..........................................................................................

(घ) ..........................................................................................

(ङ) ..........................................................................................

(च) ..........................................................................................

(छ) ..........................................................................................

(ज) ..........................................................................................

(झ) ..........................................................................................

(ञ) ..........................................................................................

© NCERT not to be republished



Reprint 2025-26

## योग्यताविस्तरः

१. **एतानि शब्दरूपाणि पठन्तु, अवगच्छन्तु, स्मरन्तु च—**

(क) अकारान्त-पुंलिङ्गशब्दाः

| विभक्तिः | शब्दाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| द्वितीया विभक्तिः | ग्राम | ग्रामम् | ग्रामौ | ग्रामान् |
| | भिक्षुक | भिक्षुकम् | भिक्षुकौ | भिक्षुकान् |
| | बालक | बालकम् | बालकौ | बालकान् |

(ख) आकारान्त-स्त्रीलिङ्गशब्दाः

| | | | | |
|---|---|---|---|---|
| द्वितीया विभक्तिः | भिक्षा | भिक्षाम् | भिक्षे | भिक्षाः |
| | माला | मालाम् | माले | मालाः |
| | बालिका | बालिकाम् | बालिके | बालिकाः |
| | तत् | ताम् | ते | ताः |

(ग) ईकारान्त-स्त्रीलिङ्गशब्दाः

| | | | | |
|---|---|---|---|---|
| द्वितीया विभक्तिः | नदी | नदीम् | नद्यौ | नदीः |
| | लेखनी | लेखनीम् | लेखन्यौ | लेखनीः |
| | भगिनी | भगिनीम् | भगिन्यौ | भगिनीः |

(घ) अकारान्त-नपुंसकलिङ्गशब्दाः

| | | | | |
|---|---|---|---|---|
| द्वितीया विभक्तिः | फल | फलम् | फले | फलानि |
| | जल | जलम् | जले | जलानि |
| | गृह | गृहम् | गृहे | गृहाणि |

(ङ) सर्वनामशब्दाः

| | | | | |
|---|---|---|---|---|
| द्वितीया विभक्तिः | अस्मद् | माम् | आवाम् | अस्मान् |
| | युष्मद् | त्वाम् | युवाम् | युष्मान् |
| | तद् | तम् | तौ | तान् |
| | एतद् | एतम् | एतौ | एतान् |

© NCERT not to be republished

२. उदाहरणानुसारम् अधोलिखितानां पदानां द्वितीयाविभक्तेः रूपाणि लिखन्तु अवगच्छन्तु च—

| युवकः – युवकम् | भिक्षा – भिक्षाम् | नदी – नदीम् | धनम् – धनम् |
|---|---|---|---|
| आसन्दः – ............ | पूजा – ............ | लेखनी – ............ | नगरम् – ............ |
| धनिकौ – ............ | कविते – ............ | जननी – ............ | पुष्पे – ............ |
| पादाः – ............ | नासिका – ............ | कर्तरी – ............ | पुष्पाणि – ............ |
| गोलदीपौ – ............ | पत्रिकाः – ............ | अङ्कन्यौ – ............ | पुस्तकानि – ............ |
| हस्तः – ............ | पेटिका – ............ | सम्मार्जन्यः – ............ | वनानि – ............ |
| अहम् – ............ | यूयम् – ............ | द्रोणी – ............ | त्वम् – ............ |
| युवाम् – ............ | आवाम् – ............ | भगिनी – ............ | सः – ............ |

३. अधोलिखितान् श्लोकान् पठन्तु, अवगच्छन्तु स्मरन्तु च—

**विना वेदं विना गीतां विना रामायणीं कथाम्।**
**विना कविं कालिदासं भारतं भारतं न हि॥**

**भावार्थः –** वेदं विना, गीतां विना, रामायणीं कथां विना, कालिदासं विना च भारतं भारतं न हि भवति। अर्थात् भारतस्य वास्तविकं स्वरूपं वेदे, गीतायां, रामायणे, कालिदासस्य काव्येषु च द्रष्टुं शक्यते।

**रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम्।**
**शयने यः स्मरेन्नित्यं दुःस्वप्नस्तस्य नश्यति।**

**भावार्थः –** यः नित्यं शयनकाले रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरं च स्मरति तस्य दुःस्वप्नं नश्यति।

© NCERT not to be republished



Reprint 2025-26

## कार्यकलापः

### भाषाक्रीडा

बालकाः गणद्वये विभजनीयाः। शिक्षकः प्रथमाविभक्त्यन्तं कमपि शब्दं वदति। प्रथमगणस्य कश्चन छात्रः तस्य एव शब्दस्य द्वितीयाविभक्तेः एकवचनरूपं वदेत्। ततश्च द्वितीयगणस्य कश्चन छात्रः तस्यैव पदस्य बहुवचनरूपं वदेत्। यस्य गणस्य छात्राः शुद्धं पदं वदन्ति तस्मै गणाय शिक्षकः अङ्कान् यच्छेत्। एवमेव द्वितीयाविभक्तेः वाक्यनिर्माणस्य क्रीडा अपि भवितुम् अर्हति।

## परियोजनाकार्यम्

१. पाठे दर्शितानां चित्राणाम् अनुसारं द्वितीयाविभक्तेः प्रयोगं कृत्वा दश वाक्यानि रचयन्तु।

२. द्वितीयाविभक्तेः आधारेण स्वदिनचर्यायाः विषये दश वाक्यानि लिखन्तु।

३. किं भवन्तः एवरेस्ट-पर्वतारोहिणीम् अरुणिमा-सिन्हां जानन्ति? तस्याः विषये अन्वेषणं कृत्वा स्वभाषया दशवाक्यैः निबन्धं लिखन्तु।

© NCERT not to be republished



Reprint 2025-26